श्रीमद्भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## वेणु गीत



सुध बुध खोकर हुई बावरी, सुन मुरली की मधुर तान।
कृष्ण मिलन की आशा प्रकटी, ऐसा निर्मल वेणु गान ।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**

**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**

**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**

**दशमः स्कन्धः**

**॥ अथैकविंशोऽध्यायः ॥**

### श्रीशुक उवाच

**इत्थं(म्) शरत्स्वच्छजलं(म्), पद्माकरसुगन्धिना ।**
**न्यविशद् वायुना वातं(म्), सगोगोपालकोऽच्युतः ॥ 1॥**

शरत्+ स्वच्छ+ जलं(म्), सगो+ गोपा+ लकोऽच्युतः

**कुसुमितवनराजिशुष्मिभृं(ङ्)ग-**
**द्विजकुलघुष्टसरः(स्)सरिन्महीध्रम् ।**
**मधुपतिरवगाह्य चारयन् गाः(स्),**
**सहपशुपालबलश्चुकूज वेणुम् ॥ 2॥**

कुसुमि+ तवनरा+ जिशुष्मि+ भृं(ङ्)ग, द्विजकु+ लघुष्ट+ सरः(स्)
सरिन्+ महीध्रम्, मधुपति+ रवगाह्य , सहपशुपा+ लबलश्+ चुकूज

तद् व्रजस्त्रिय आश्रुत्य, वेणुगीतं(म्) स्मरोदयम् ।
काश्चित् परोक्षं(ङ्) कृष्णस्य, स्वसखीभ्योऽन्ववर्णयन् ॥ 3॥

स्वसखी+ भ्योऽन्+ ववर्णयन्

तद् वर्णयितुमारब्धाः(स्), स्मरन्त्यः(ख्) कृष्णचेष्टितम् ।
नाशकन् स्मरवेगेन, विक्षिप्तमनसो नृप ॥ 4॥

वर्ण+ यितुमा+ रब्धाः(स्), कृष्ण+ चेष्टितम् , स्म+ रवेगेन , विक्षिप्+ तमनसो

बर्हापीडं(न्) नटवरवपुः(ख्) कर्णयोः(ख्) कर्णिकारं(म्),
बिभ्रद् वासः(ख्) कनककपिशं(म्) वैजयन्तीं(ञ्) च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैर्-
वृन्दारण्यं(म्) स्वपदरमणं(म्) प्राविशद् गीतकीर्तिः ॥ 5॥

बिभ्रद्+ वासः(ख्), वेणो+ रध+ रसुधया

इति वेणुरवं(म्) राजन्, सर्वभूतमनोहरम् ।
श्रुत्वा व्रजस्त्रियः(स्) सर्वा, वर्णयन्त्योऽभिरेभिरे ॥ 6॥

वर्ण+ यन्त्योऽ+ भिरेभिरे

गोप्य ऊचुः

अक्षण्वतां(म्) फलमिदं(न्) न परं(म्) विदामः(स्),
सख्यः(फ्) पशूननु विवेशयतोर्वयस्यैः ।
वक्त्रं(म्) व्रजेशसुतयोरनुवेणु जुष्टं(म्),
यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ 7॥

अक्षण्+ वतां(म्), विवे+ शयतोर्+ वयस्यैः , व्रजे+ शसुतयो+ रनुवेणु , निपी+ तमनुरक्त+ कटाक्षमोक्षम्

चूतप्रवालबर्हस्तबकोत्पलाब्ज-
मालानुपृक्तपरिधानविचित्रवेषौ ।
मध्ये विरेजतुरलं(म्) पशुपालगोष्ठ्यां(म्),
रं(ङ्)गे यथा नटवरौ क्व च गायमानौ ॥ 8॥

चूत+ प्रवा+ लबर्हस् + तब+ कोत्+ पलाब्ज, माला+ नुपृक्त+ परिधा+ नविचित्र+ वेषौ, पशुपा+ लगोष्ठ्यां(म्)

गोप्यः(ख्) किमाचरदयं(ङ्) कुशलं(म्) स्म वेणुर्-

दामोदराधरसुधामपि गोपिकानाम् ।

भुङ्क्ते स्वयं(म्) यदवशिष्टरसं(म्) ह्रदिन्यो,

हृष्यत्त्वचोऽश्रुमुमुचुस्तरवो यथाऽऽर्याः ॥ 9॥

किमा+ चरदयं(ङ्), दामोदरा+ धरसुधा+ मपि

यदव+ शिष्टरसं(म्), हृष्यत्+ त्वचोऽ+ श्रुमुमुचुस्+ तरवो

वृन्दावनं(म्) सखि भुवो वितनोति कीर्तिं(म्),

यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ।

गोविन्दवेणुमनु मत्तमयूरनृत्यं(म्),

प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ 10॥

देवकी+ सुतपदाम्+ बुजलब्ध+ लक्ष्मि , मत्+ तमयू+ रनृत्यं(म्)

प्रेक्ष्या+ द्रिसान्+ वपरतान्+ यसमस्+ तसत्त्वम्

धन्याः(स्) स्म मूढमतयोऽपि हरिण्य एता,

या नन्दनन्दनमुपात्तविचित्रवेषम् ।

आकर्ण्य वेणुरणितं(म्)  सहकृष्णसाराः(फ्),

पूजां(न्) दधुर्विरचितां(म्) प्रणयावलोकैः ॥ 11॥

मूढ+ मतयोऽपि, नन्दनन्द+ नमुपात्+ तविचित्रवेषम्

वेणु+ रणितं(म्), दधुर्+ विरचितां(म्), प्रणया+ वलोकैः

कृष्णं(न्) निरीक्ष्य वनितोत्सवरूपशीलं(म्),

श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ।

देव्यो विमानगतयः(स्) स्मरनुन्नसारा,

भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ 12॥

वनितोत्+ सवरू+ पशीलं(म्), तत्+ क्वणि+ तवे+ णुविचित्रगीतम्

विमा+ नगतयः(स्), स्मरनुन्+ नसारा ,

भ्रश्यत्+ प्रसू+ नकबरा ,मुमुहुर्+ विनीव्यः

गावश्च कृष्णमुखनिर्गतवेणुगीत-

पीयूषमुत्तभितकर्णपुटैः(फ्) पिबन्त्यः ।

शावाः(स्) स्नुतस्तनपयः(ख्)कवलाः(स्) स्म तस्थुर्-

गोविन्दमात्मनि दृशाश्रुकलाः(स्) स्पृशन्त्यः ॥ 13॥

कृष्णमुख+ निर्गत+ वेणुगीत, पीयू+ षमुत्तभित+ कर्णपुटैः(फ्)

स्नुतस्+ तनपयः(ख्), गोविन्+ दमात्मनि ,

दृशा+ श्रुकलाः(स्)

प्रायो बताम्ब विहगा मुनयो वनेऽस्मिन्,

कृष्णेक्षितं(न्) तदुदितं(ङ्) कलवेणुगीतम् ।

आरुह्य ये द्रुमभुजान् रुचिरप्रवालान्,

शृण्वन्त्यमीलितदृशो विगतान्यवाचः ॥ 14।

रुचिर+ प्रवालान् , शृण्वन्त्य+ मीलि+ तदृशो ,

विगतान्+ यवाचः

नद्यस्तदा तदुपधार्य मुकुन्दगीत-

मावर्तलक्षितमनोभवभग्नवेगाः ।

आलिं(ङ्)गनस्थगितमूर्मिभुजैर्मुरारेर्-

गृह्णन्ति पादयुगलं(ङ्) कमलोपहाराः ॥ 15॥

तदु+ पधार्य, मावर्+ तलक्षि+ तमनो+ भवभग्+ नवेगाः

आलिं(ङ्)गनस्+ थगितमूर्+ मिभुजैर्+ मुरारेर्, कमलो+ पहाराः

दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः(स्),

सं(ञ्)चारयन्तमनु वेणुमुदीरयन्तम् ।

प्रेमप्रवृद्ध उदितः(ख्) कुसुमावलीभिः(स्),

सख्युर्व्यधात् स्ववपुषाम्बुद आतपत्रम् ॥ 16॥

सं(ञ्)चा+ रयन्+ तमनु वेणुमुदी+ रयन्तम्

कुसुमा+ वलीभिः(स्) ,सख्युर्+ व्यधात् ,

स्व+ वपुषाम्+ बुद

पूर्णाः(फ्) पुलिन्द्य उरुगायपदाब्जराग-

श्रीकुं(ङ्)कुमेन दयितास्तनमण्डितेन ।

तद्दर्शनस्मररुजस्तृणरूषितेन,

लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ 17॥

उरुगा+ यपदाब्+ जराग , दयितास्+ तन+ मण्डितेन

तद्दर्शनस्+ मररुजस्+ तृणरूषितेन ,जहुस्+ तदाधिम्

हन्तायमद्रिरबला हरिदासवर्यो,

यद् रामकृष्णचरणस्पर्शप्रमोदः ।

मानं(न्) तनोति सहगोगणयोस्तयोर्यत्,

पानीयसूयवसकन्दरकन्दमूलैः ॥ 18॥

हन्ता+ यमद्रि+ रबला, रामकृष्णचरण+ स्पर्शप्रमोदः

सहगो+ गणयोस्+ तयोर्यत् ,

पानीयसू+ यवसकन्+ दरकन्+ दमूलैः

गा गोपकैरनुवनं(न्) नयतोरुदार-

वेणुस्वनैः(ख्) कलपदैस्तनुभृत्सु सख्यः ।

अस्पन्दनं(ङ्) गतिमतां(म्) पुलकस्तरूणां(न्),

निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ 19॥

गोपकै+ रनुवनं(न्),कल+ पदैस्+ तनुभृत्सु

पुलकस्+ तरूणां(न्),

निर्यो+ गपाशकृतल+ क्षणयोर् + विचित्रम्

एवं(व्)विधा भगवतो,  या वृन्दावनचारिणः ।

वर्णयन्त्यो मिथो गोप्यः(ख्), क्रीडास्तन्मयतां(म्) ययुः ॥ 20॥

वर्ण+ यन्त्यो, क्रीडास्+ तन्मयतां(म्)

इति श्रीमद्भागवते महापुराणे पारमहंस्यां(म्) संहितायां(न्)

दशमस्कन्धे पूर्वार्धे वेणुगीतं(न्) नामैकविंशोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

